अञ्जली एस अञ्जली । पिट्ठी पिट्ठं । पृष्ठमित्वे कृते स्त्रियामेवेदं
अच्छी अच्छिं । पण्हा पण्हो । चोरिआ चोरिअं । एवं कुच्छी
बली । निही । विही । रस्सी । गण्ठी । इत्यञ्जल्यादयः ॥
इति तु संस्कृतवदेव सिद्धम् ॥ इमेति तन्त्रेण त्वादेशस्य डिमा
पृथ्व्यादीनाश्च संग्रहः । त्वादेशस्य स्त्रीत्वमेवेच्छन्त्येके ॥

बाहोरात् ॥ ३६ ॥

बाहुशब्दस्य स्त्रियामाकारोन्तादेशो भवति ॥ बाहाए जेण धरि
एक्काए ॥ स्त्रियामित्येव । वामेअरो बाहू ॥

अतो डो विसर्गस्य ॥ ३७ ॥

संस्कृतलक्षणोत्पन्नस्यातः परस्य विसर्गस्य स्थाने डो इत्यादेशो
वति ॥ सर्वतः । सव्वओ ॥ पुरतः । पुरओ ॥ अग्रत । अग्गओ ।
मार्गतः । मग्गओ ॥ एवं सिद्धावस्थापेक्षया । भवत. । भवओ ।
भवन्तः । भवन्तो ॥ सन्तः । सन्तो ॥ कुतः । कुदो ॥

---

१ B P °ल्लादि ए° २ A °दि स° ३ P °त्वादे° ४ P ए° ५ B °च्छन्त्ये

नी ऐन्द्री मान्य-व्यौर्वा ॥ ३८ ॥

इन्द्रेणी [illegible] [illegible] च वे
न्द्री वा भवतः । [illegible]निर्देशः [illegible]
। [illegible] [illegible] । परिढा [illegible] । [illegible]

: ॥ ३९ ॥

[illegible] [illegible] [१,१०७] इत्यादि
: ॥

[illegible] [illegible] [illegible] ॥ ४० ॥
[illegible] [illegible] [illegible] [illegible]
ति । [illegible] [illegible] [illegible] । [illegible]
: ॥

[illegible] ॥ ४१ ॥
[illegible] [illegible] वा भवति ॥
। [illegible] [illegible] । [illegible] [illegible] ।

: [illegible] ॥ ४२ ॥
[illegible] [illegible] भवति [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

मुइङ्गो । किविणो । उत्तिमो । मिरिअं । दिण्णं ॥ बहुलाधिकाराण्ण-त्वाभावे न भवति । दत्तं । देवदत्तो ॥ स्वप्न । ईषत् । वेतस । व्य-लीक । व्यजन । मृदङ्ग । कृपण । उत्तम । मरिच । दत्त । इत्यादि ॥

पक्वाङ्गार-ललाटे वा ॥ ४७ ॥

एष्वादेरत इत्वं वा भवति ॥ पिक्कं पक्कं । इङ्गालो अङ्गारो । णिडालं णडालं ॥

मध्यम-कतमे द्वितीयस्य ॥ ४८ ॥

मध्यमशब्दे कतमशब्दे च द्वितीयस्यात इत्वं भवति ॥ मज्झिमो । कइमो ॥

सप्तपर्णे वा ॥ ४९ ॥

सप्तपर्णे द्वितीयस्यात इत्वं वा भवति । छत्तिवण्णो । छत्तवण्णो ॥

मयट्यइर्वा ॥ ५० ॥

मयट्प्रत्यये आदेरतः स्थाने अइ इत्यादेशो भवति वा । विषमयः । विसमइओ विसमओ ॥

ईर्हरे वा ॥ ५१ ॥

हरशब्दे आदेरत ईर् भवति वा । हीरो हरो ।

ध्वनि-विष्वचोरुः ॥ ५२ ॥

अनयोरादेरस्य उत्वं भवति । झुणी । वीसुं । कथं सुणओ । शुनक इति प्रकृत्यन्तरस्य । श्वन्शब्दस्य तु सा साणो इति प्रयोगौ भवतः ।

वन्द्र-खण्डिते णा वा ॥ ५३ ॥

अनयोरादेरस्य णकारेण सहितस्य उत्वं वा भवति । वुन्द्रं वन्द्रं । खुडिओ खण्डिओ ।

गवये वः ॥ ५४ ॥

गवयशब्दे वकाराकारस्य उत्वं भवति । गउओ । गउआ ।

[illegible]

प्रथमे प-योवा ॥ ५६ ॥

प्रथमशब्दे [illegible] क्रमेण न [illegible]
भवति [illegible]

ओ गन्वोभिडादो ॥ ५७ ॥

[illegible]

नमस्कार-परस्परे द्वितीयस्य ॥ ६२ ॥

अनयोर्द्वितीयस्य अत ओत्वं भवति ॥ नमोक्कारो । परोप्परं ॥

वार्पौ ॥ ६३ ॥

अर्पयतौ धातौ आदेरस्य ओत्वं वा भवति ॥ ओप्पेइ अप्पेइ । ओप्पिअं अप्पिअं ॥

स्वपावुच्च ॥ ६४ ॥

स्वपितौ धातौ आदेरस्य ओत् उत् च भवति । सोवइ । सुवइ ।

नात्पुनर्यादाई वा ॥ ६५ ॥

नञः परे पुनःशब्दे आदेरस्य आ आइ इत्यादेशौ वा भवतः । न उणा । न उणाइ । पक्षे । न उण । न उणो । केवलस्यापि दृश्यते । पुणाइ ।

वालाब्वरण्ये लुक् ॥ ६६ ॥

अलाब्वरण्यशब्दयोरादेरस्य लुग् वा भवति । लाउं अलाउं । लाऊ अलाऊ । रण्णं अरण्णं । अत इत्येव । आरण्ण-कुञ्जरोव्व वेल्लन्तो ।

वाव्ययोत्खातादावदातः ॥ ६७ ॥

अव्ययेषु उत्खातादिषु च शब्देषु आदेराकारस्य अद् वा भवति । [illegible]

पुव्वण्हो पुव्वाण्हो ॥ दवग्गी । दावग्गी । चडू । चाडू । इति वस्तुभेदात् सिद्धम् ॥

घञ्वृद्धेर्वा ॥ ६८ ॥

घञ्निमित्तो यो वृद्धिरूप आकारस्तस्यादिभूतस्य अद् वा भवति । पवहो पवाहो । पहरो पहारो । पयरो पयारो । प्रकारः प्रचारो वा । पत्थवो पत्थावो ॥ क्वचिन्न भवति । रागः । राओ ॥

महाराष्ट्रे ॥ ६९ ॥

महाराष्ट्रशब्दे आदेराकारस्य अद् भवति ॥ मरहट्ठं । मरहट्ठो ॥

मांसादिष्वनुस्वारे ॥ ७० ॥

मांसप्रकारेषु अनुस्वारे सति आदेरातः अद् भवति ॥ मंसं । पंसू । पंसणो । कंसं । कंसिओ । वंसिओ । पंडवो । संसिद्धिओ । संजत्तिओ ॥ अनुस्वार इति किम् । मासं । पासू ॥ मांस । पांसु । पांसन । कांस्य । कांसिक । वांशिक । पाण्डव । सांसिद्धिक । सांयात्रिक । इत्यादि ॥

श्यामाके मः ॥ ७१ ॥

श्यामाके मस्य आतः अद् भवति ॥ सामओ ॥

इः सदादौ वा ॥ ७२ ॥

सदादिषु शब्देषु आत इत्वं वा भवति ॥ सइ सया । निसि-अरो निसा-अरो । कुप्पिसो कुप्पासो ॥

आचार्ये चोच्च ॥ ७३ ॥

आचार्यशब्दे चस्य आत इत्वम् अत्वं च भवति । आइरिओ आयरिओ ॥

ईः स्त्यान-खल्वाटे ॥ ७४ ॥

स्त्यानखल्वाटयोरादेरात ईद् भवति । ठीणं । थीणं । थिण्णं । खल्लीडो । संखायम् इति तु समः स्त्यः खा [४.१५] इति खादेशे सिद्धम् ।

[illegible]

उः सास्ना-स्तावके ॥ ७५ ॥

अनयोरादेरात उत्वं भवति ॥ सुण्हा । थुवओ ॥

ऊद्वासारे ॥ ७६ ॥

आसारशब्दे आदेरात ऊद् वा भवति ॥ ऊसारो । आसारो ॥

आर्यायां र्यः श्वश्र्वाम् ॥ ७७ ॥

आर्याशब्दे श्वश्र्वां वाच्यायां र्यस्यात ऊर्भवति ॥ अज्जू ॥ श्वश्र्वामिति किम् । अज्जा ॥

एद्ग्राह्ये ॥ ७८ ॥

ग्राह्यशब्दे आदेरात एद् भवति ॥ गेज्झं ॥

द्वारे वा ॥ ७९ ॥

द्वारशब्दे आत एद् वा भवति ॥ देरं । पक्षे । दुआरं दारं वारं ॥ कथं नेरइओ नारइओ । नैरयिकनारयिकशब्दयोर्भविष्यति ॥ आर्षे अन्यत्रापि । पच्छेकम्मं । असहेज्ज देवासुरी ॥

पारापते रो वा ॥ ८० ॥

पारापतशब्दे रस्थस्यात एद् वा भवति ॥ पारेवओ पारावओ ॥

मात्रटि वा ॥ ८१ ॥

मात्रट्प्रत्यये आत एद् वा भवति ॥ एत्तिअमेत्तं । एत्तिअमत्तं ॥ बहुलाधिकारात् क्वचिन्मात्रशब्देपि । भोयण-मेत्तं ॥

उदोद्वार्द्रे ॥ ८२ ॥

आर्द्रशब्दे आदेरात उद् ओच्च वा भवतः ॥ उल्लं ओल्लं । पक्षे । अल्लं अद्दं ॥

[illegible]

ओदाल्यां पङ्क्तौ ॥ ८३ ॥

आलीशब्दे पङ्क्तिवाचिनि आत ओत्वं भवति ॥ ओली ॥ पङ्क्ताविति किम् । आली सखी ॥

ह्रस्वः संयोगे[१] ॥ ८४ ॥

दीर्घस्य यथादर्शनं संयोगे परे ह्रस्वो भवति ॥ आत् । आम्रम् । अम्बं ॥ ताम्रम् । तम्बं ॥ विरहाग्निः । विरहग्गी ॥ आस्यम् । अस्सं ॥ ईत् । मुनीन्द्रः । मुणिन्दो ॥ तीर्थम् । तित्थं ॥ ऊत् । गुरूल्लापाः । गुरुल्लावा ॥ चूर्णः । चुण्णो ॥ एत् । नरेन्द्रः । नरिन्दो ॥ म्लेच्छः । मिलिच्छो ॥ दिट्ठिक्क-थणवट्टं ॥ ओत् । अधरोष्ठः । अहरुट्ठं ॥ नीलोत्पलम् । नीलुप्पलं ॥ संयोग इति किम् । आयासं । ईसरो । ऊसवो ॥

इत एद्वा ॥ ८५ ॥

संयोग इति वर्तते । आदेरिकारस्य संयोगे परे एकारो वा भवति । पेण्डं पिण्डं । धम्मेल्लं धम्मिल्लं । सेन्दूरं सिन्दूरं । वेण्हू विण्हू । पेट्ठं पिट्ठं । बेल्लं बिल्लं ॥ क्वचिन्न भवति । चिन्ता ॥

किंशुके वा ॥ ८६ ॥

किंशुकशब्दे आदेरित एकारो वा भवति । केसुअं किंसुअं ॥

मिरायाम् ॥ ८७ ॥

मिराशब्दे इत एकारो[३] भवति ॥ मेरा ॥

पथि-पृथिवी-प्रतिश्रुन्मूषिक-हरिद्रा-बिभीतकेष्वत् ॥ ८८ ॥

एषु आदेरितोकारो भवति । पहो । पुहई । पुढवी । पडंसुआ । मूसओ । हलद्दी हलद्दा । बहेडओ । पन्थं किर देसित्ति तु पथिशब्दसमानार्थस्य पन्थशब्दस्य भविष्यति । हरिद्रायां विकल्प इत्यन्ये । हलिद्दी हलिद्दा ॥

[illegible]

शिथिलेङ्गुदे वा ॥ ८९ ॥

अनयोरादेरितोऽद् वा भवति ॥ सढिलं । पसढिलं । सिढिलं । पसि-
ढिलं । अङ्गुअं । इङ्गुअं ॥ निर्मितशब्दे तु वा आत्वं न विधेयम् ।
निर्मातनिर्मितशब्दाभ्यामेव सिद्धेः ॥

तित्तिरौ रः ॥ ९० ॥

तित्तिरिशब्दे रस्येतोऽद् भवति ॥ तित्तिरो ॥

इतौ तो वाक्यादौ ॥ ९१ ॥

वाक्यादिभूते इतिशब्दे यस्तस्तत्संबन्धिन इकारस्य अकारो भवति ।
इअ जंपिआवसाणे । इअ विअसिअ-कुसुमसरो । वाक्यादाविति
किम् । पिओ त्ति । पुरिसो त्ति ॥

ईर्जिह्वा-सिंह-त्रिंशद्विंशतौ त्या ॥ ९२ ॥

जिह्वादिषु इकारस्य तिना सह ईर्भवति । जीहा । सीहो ।
तीसा । वीसा । बहुलाधिकारात् क्वचिन्न भवति । सिंहदत्तो ।
सिंहराओ ।

र्लुकि निरः ॥ ९३ ॥

निरुपसर्गस्य रेफलोपे सति इत ईकारो भवति । नीसरइ । नी-
सासो । लुकीति किम् । निण्णओ । निस्सहाइं अङ्गाइं ।

द्विन्योरुत् ॥ ९४ ॥

द्विशब्दे नावुपसर्गे च इत उद् भवति । द्वि । दुमत्तो । दुआई ।
दुविहो । दुरेहो । दुवयणं । बहुलाधिकारात् क्वचिद् विकल्पः । दुउणो
बिउणो । दुइओ बिइओ । क्वचिन्न भवति । द्विजः
दिओ । द्विरदः दिरओ । क्वचिदोत्वमपि । दोवयणं । नि ।
णुमज्जइ । णुमन्नो । क्वचिन्न भवति । निवडइ ।

प्रवासीक्षौ ॥ ९५ ॥
प्रवासीक्ष्वोरादेरित उत्वं भवति ॥ पावासुओ । उच्छू ॥

युधिष्ठिरे वा ॥ ९६ ॥
युधिष्ठिरशब्दे आदेरित उत्वं वा भवति ॥ जहुट्ठिलो । जहिट्ठिलो ॥

ओच्च द्विधाकृगः ॥ ९७ ॥
द्विधाशब्दे कृगधातोः प्रयोगे इत ओत्वं चकारादुत्वं च भवति ॥ दोहा किज्जइ । दुहा-किज्जइ ॥ दोहा इअं । दुहा इअं ॥ कृग इति किम् । दिहा गयं ॥ क्वचित् केवलस्यापि । दुहा वि सो सुरवहू-[illegible]

वा निर्झरे ना ॥ ९८ ॥
निर्झरशब्दे नकारेण सह इत ओकारो वा भवति ॥ ओज्झरो । निज्झरो ॥

हरीतक्यामीतोत् ॥ ९९ ॥
हरीतकीशब्दे आदेरीकारस्य अत् भवति ॥ हरडई ॥

आत्कश्मीरे ॥ १०० ॥
कश्मीरशब्दे ईत आद् भवति ॥ कम्हारा ॥

पानीयादिष्वित् ॥ १०१ ॥
पानीयादिषु शब्देषु ईत इद् भवति ॥ पाणिअं । अलिअं । जिअइ । [illegible] करिसो । सिरिसो । दुइअं । [illegible]

उज्जीर्णे ॥ १०२ ॥

जीर्णशब्दे ईत उद् भवति ॥ जुण्ण-सुरा ॥ क्वचिन्न भवति । जिण्णे भोअणमत्ते ॥

ऊर्हीन-विहीने वा ॥ १०३ ॥

अनयोरीत ऊत्वं वा भवति ॥ हूणो हीणो । विहूणो विहीणो । वि- हीन इति किम् । पहीण-जर-मरणा ॥

तीर्थे हे ॥ १०४ ॥

तीर्थशब्दे हे सति ईत ऊत्वं भवति । सूहं । ह इति किम् । तित्थं ॥

एत्पीयूषापीड-बिभीतक-कीदृशेदृशे ॥ १०५ ॥

एषु ईत एत्वं भवति ॥ पेऊसं । आमेलो । बहेडओ । केरिसो । एरिसो ॥

नीड-पीठे वा ॥ १०६ ॥

अनयोरीत एत्वं वा भवति । नेडं नीडं । पेढं पीढं ।

उतो मुकुलादिष्वत् ॥ १०७ ॥

मुकुल इत्येवमादिषु शब्देषु आदेरुतोत्वं भवति । मउलं । मउलो । [illegible]

[illegible]

वोपरौ ॥ १०८ ॥

[illegible]

गुरौ के वा ॥ १०९ ॥

[illegible]

इर्भ्रुकुटौ ॥ ११० ॥

भ्रुकुटावादेरुत इर्भवति ॥ भिउडी ॥

पुरुषे रोः ॥ १११ ॥

पुरुषशब्दे रोरुत इर्भवति ॥ पुरिसो । पउरिसं ॥

ईः क्षुते ॥ ११२ ॥

क्षुतशब्दे आदेरुत ईत्वं भवति ॥ छीअं ॥

ऊत्सुभगमुसले वा ॥ ११३ ॥

अनयोरादेरुत ऊद् वा भवति ॥ सूहवो सुहओ । मूसलं मुसलं ॥

अनुत्साहोत्सन्ने त्सच्छे ॥ ११४ ॥

उत्साहोत्सन्नवर्जिते शब्दे यौ त्सच्छौ तयोः परयोरादेरुत ऊद् भवति ॥ त्स । ऊसुओ । ऊसवो । ऊसित्तो । ऊसरइ ॥ च्छ । उद्गतः शुकः ऊसुओ । ऊससइ ॥ अनुत्साहोत्सन्न इति किं । उच्छाहो । उच्छन्नो ॥

लुकि दुरो वा ॥ ११५ ॥

दुरुपसर्गस्य रेफस्य लुकि सति उत ऊत्वं वा भवति । दूसहो दुसहो । दूहवो दुहओ ॥ लुकीति किम् । दुस्सहो विरहो ।

ओत्संयोगे ॥ ११६ ॥

संयोगे परे आदेरुत ओत्वं भवति । तोण्डं मोण्डं पोक्खरं कोट्टिमं पोत्थओ । लोद्धओ मोत्था मोग्गरो । पोग्गलं कोण्ढो कोन्तो वोक्कन्तं ।

कुतूहले वा ह्रस्वश्च ॥ ११७ ॥

कुतूहलशब्दे उत ओद् वा भवति तत्संनियोगे ह्रस्वश्च वा । कोउहलं कुऊहलं कोऊहल्लं ।

[illegible]

इदुतौ वृष्ट-वृष्टि-पृथङ्-मृदङ्ग-नप्तृके ॥ १३७ ॥

एषु ऋत इकारोकारौ भवतः ॥ विट्ठो वुट्ठो । विट्ठी वुट्ठी ।[1] मिइङ्गो मुइङ्गो । नत्तिओ नत्तुओ ॥

वा बृहस्पतौ ॥ १३८ ॥

बृहस्पति[2]शब्दे ऋत इदुतौ वा भवतः ॥ बिहप्फई बुहप्फई । बहप्फई ॥

इदेदोद्वृन्ते ॥ १३९ ॥

वृन्तशब्दे ऋत इत् एत् ओच्च भवन्ति ॥ विण्टं वेण्टं वोण्टं ॥

रिः केवलस्य ॥ १४० ॥

केवलस्य व्यञ्जनेनासंपृक्तस्य ऋतो रिरादेशो भवति ॥ रिद्धी[3] ॥

ऋणर्ज्वृषभर्त्वृषौ वा ॥ १४१ ॥

ऋणऋजुऋषभऋतुऋषिषु ऋतो रिर्वा भवति ॥ रिणं अणं । उज्जू । रिसहो उसहो । रिऊ उऊ । रिसी इसी ॥

दृशः क्विप्-टक्सकः ॥ १४२ ॥

क्विप् टक् सक् इत्येतदन्तस्य दृशेर्धातोर्ऋतो रिरादेशो भवति ॥ सदृक् । सरि-वण्णो । सरि-रूवो । सरि-बन्दीणं[5] ॥ सदृशः । सरिसो ॥ सदृक्षः । सरिच्छो ॥ एवम् एआरिसो । भवारिसो । जारिसो । तारिसो । केरिसो । एरिसो । अन्नारिसो । अम्हारिसो । तुम्हारिसो ॥ टक्सकसाहचर्यात् त्यदाद्यन्यादि[हे० ५. १]सूत्रविहितः क्विब् इह गृह्यते ॥

आदृते ढिः ॥ १४३ ॥

आदृतशब्दे ऋतो ढिरादेशो भवति ॥ आढिओ ॥

अरिर्दृप्ते ॥ १४४ ॥

दृप्तशब्दे ऋतोरिरादेशो भवति ॥ दरिओ । दरिअ-सीहेण ॥

---

1 A मुयङ्गो 2 B °तौ श°. 3 P भवति. 4 B रिधू 5 B इइ 6 A सरिबंदीणं.

[illegible] ॥ [illegible] ॥

[illegible]

[illegible] ॥ [illegible] ॥

[illegible]

[illegible] ॥ [illegible] ॥

[illegible]

[illegible] ॥ [illegible] ॥

[illegible]

[illegible] ॥ [illegible] ॥

[illegible]

[illegible]

[illegible]

[illegible]

वैदर्भ । वैश्वानर । कैतव । वैशाख । वैशाल । स्वैर । चैत्य ॥
दि ॥ विश्लेषे न भवति । चैत्यम् । चेइअ ॥ आर्षे । चैत्य
ची-वन्दणं ॥

वैरादौ वा ॥ १५२ ॥

वैरादिषु ऐतः अइरादेशो वा भवति ॥ वइरं वेरं । कइलासो
सो । कइरवं केरवं । वइसवणो वेसवणो । वइसम्पायणो वेस
यणो । वइआलिओ वेआलिओ । वइसिअं वेसिअं । चइत्तो
वैर । कैलास । कैरव । वैश्रवण । वैशम्पायन । वैतालिक । वैशि
चैत्र । इत्यादि ॥

एच्च दैवे ॥ १५३ ॥

दैवशब्दे ऐत एत् अइश्चादेशो भवति ॥ देव्वं दइव्वं दइवं ॥

उच्चैर्नीचैस्यअः ॥ १५४ ॥

अनयोरैतः अअ इत्यादेशो भवति ॥ उच्चअं । नीचअं ।
भ्यां कै सिद्धम् । उच्चैर्नीचैसोस्तु रूपान्तरनिवृत्त्यर्थं वचनम् ॥

ईर्द्धैर्ये ॥ १५५ ॥

धैर्यशब्दे ऐत ईद् भवति ॥ धीरं हरइ विसाओ ॥

ओतोद्वान्योन्य-प्रकोष्ठातोद्य-शिरोवेदना-मनोहर-सरोरु

क्तोश्च वः ॥ १५६ ॥

एषु ओतोत्वं वा भवति तत्संनियोगे च
वादेशः ॥ अन्नन्नं अन्नुन्नं । पवट्ठो पउट्ठो । आवज्जं आउज्जं ॥
विअणा सिरो-विअणा । मणहरं मणोहरं । सररुहं सरोरुहं ॥

ऊत्सोच्छ्वासे ॥ १५७ ॥

सोच्छ्वासशब्दे ओत ऊद् भवति ॥ सोच्छ्वासं । सूसासो ॥

१ P ऐतोऽइ इत्यादेः. २ B देव्वं दैव दइव ३ P °नीचैःस्य ४ B
५ A वैतनम°. ६ A सिरिरि° ७ B °च्छ्वासे ऊ° ८ A °म

[illegible]

[illegible] ॥ १७० ॥

[illegible]

[illegible] ॥ १७१ ॥

[illegible]

[illegible] ॥ १७४ ॥

[illegible]

[illegible] ॥ १७५ ॥

[illegible]

[illegible] ॥ १७६ ॥

[illegible]

एत्त्रयोदशादौ स्वरस्य सस्वरव्यञ्जनेन ॥ १६५ ॥

त्रयोदश इत्येवंप्रकारेषु संख्याशब्देषु आदेः स्वरस्य परेण सस्वर-व्यञ्जनेन सह एद् भवति ॥ तेरह । तेवीसा । तेत्तीसा ॥

स्थविर-विचकिलायस्कारे ॥ १६६ ॥

एषु आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह एद् भवति ॥ थेरो । वेइल्लं । मुद्ध-विअइल्ल-पसूणपुञ्जा इत्यपि दृश्यते । एक्कारो ॥

वा कदले ॥ १६७ ॥

कदलशब्दे आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह एद् वा भवति ॥ केलं कयलं । केली कयली ॥

वेतः कर्णिकारे ॥ १६८ ॥

कर्णिकारे इतः सस्वरव्यञ्जनेन सह एद् वा भवति ॥ कण्णेरो कण्णिआरो ॥

अयौ वैत् ॥ १६९ ॥

अयिशब्दे आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह ऐद् वा भवति ॥ ऐ बीहेमि । अइ उम्मत्तिए । वचनादैकारस्यापि प्राकृते प्रयोगः ॥

ओत्पूतर-बदर-नवमालिका-नवफलिका-पूगफले ॥ १७० ॥

पूतरादिषु आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह ओद् भवति ॥ पोरो । बोरं । बोरी । नोमालिआ । नोहलिआ । पोप्फलं । पोप्फली ॥

न वा मयूख-लवण-चतुर्गुण-चतुर्थ-चतुर्दश-चतुर्वार-सुकुमार-कुतूहलोदूखलोलूखले ॥ १७१ ॥

मयूखादिषु आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह ओद् वा भवति ॥ मोहो मऊहो । लोणं । इअ लवणुग्गमा । चोग्गुणो चउग्गुणो ।

१ B °चकिले° २ B °स्वरस्य° ३ P तेत्तीसा ४ A दुद्ध° ५ B दं° ६ A पेरा ७ P अइ ८ A °गम. ९ P चउग्गुणो

चोत्थो चउत्थो । चोत्थी चउत्थी । चोद्दह । चउद्दह । चोद्दसी चउद्दसी । चोव्वारो चउव्वारो । सोमालो सुकुमालो । कोहलं कोउहल्लं । तह मन्ने कोहलिए । ओहलो उऊहलो । ओक्खलं । उलूहलं ॥ मोरो मऊरो इति तु मोरमयूरशब्दाभ्यां सिद्धम् ॥

अवापोते ॥ १७२ ॥

अव अप इत्येतयोरुत च विकल्पार्थनिपाते च आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह ओद् वा भवति ॥ अव । ओअरइ अवयरइ । ओआसो अवयासो ॥ अप । ओसरइ अवसरइ । ओसारिअं अवसारिअं ॥ उत । ओ वणं । ओ घणो । उअ वणं । उअ घणो ॥ क्वचिन्न भवति । अवगयं । अवसद्दो । उअ रवी ॥

ऊच्चोपे ॥ १७३ ॥

उपशब्दे आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह ऊत् ओच्चादेशौ वा भवतः ॥ ऊहसिअं ओहसिअं उवहसिअं । ऊज्झाओ ओज्झाओ उवज्झाओ । ऊआसो ओआसो उववासो ॥

उमो निषण्णे ॥ १७४ ॥

निषण्णशब्दे आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह उम आदेशो वा भवति ॥ णुमण्णो । णिसण्णो ।

प्रावरणे अङ्ग्वाऊ ॥ १७५ ॥

प्रावरणशब्दे आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह अङ्गु आउ इत्यादेशौ वा भवतः ॥ पङ्गुरणं पाउरणं पावरणं ॥

स्वरादसंयुक्तस्यानादेः ॥ १७६ ॥

अधिकारोऽयम् । यदित ऊर्ध्वमनुक्रमिष्यामस्तत्स्वरात्परस्यासंयुक्तस्यानादेर्भवतीति वेदितव्यम् ॥

[illegible]

शीकरे भ-हौ वा ॥ १८४ ॥

शीकरे कस्य भहौ वा भवतः ॥ सीभरो सीहरो । पक्षे । सीअरो ॥

चन्द्रिकायां मः ॥ १८५ ॥

चन्द्रिकाशब्दे कस्य मो भवति ॥ चन्दिमा ॥

निकष-स्फटिक-चिकुरे हः ॥ १८६ ॥

एषु कस्य हो भवति ॥ निहसो । फलिहो । चिहुरो । चिहुरशब्दः संस्कृतेपि इति दुर्गः ॥

ख-घ-थ-ध-भाम् ॥ १८७ ॥

स्वरात्परेषामसंयुक्तानामनादिभूतानां ख घ थ ध भ इत्येतेषां वर्णानां प्रायो हो भवति ॥ ख । साहा । मुहं । मेहला । लिहइ ॥ घ । मेहो । जहणं । माहो । लाहइ ॥ थ । नाहो । आवसहो । मिहुणं । कहइ ॥ ध । साहू । वाहो । बहिरो । बाहइ । इन्दहणू ॥ भ । सहा । सहावो । नहं । थणहरो । सोहइ ॥ स्वरादित्येव । संखो । संघो । कंथा । बंधो । खंभो ॥ असंयुक्तस्येत्येव । अक्खइ । अग्घइ । कत्थइ । सिद्धओ । बन्धइ । लब्भइ ॥ अनादेरित्येव । गज्जन्ते खे मेहा । गच्छइ घणो ॥ प्रायो ग्रहणात् सरिसव-खलो । पलय-घणो । अथिरो । जिण-धम्मो । पणट्ठ-भओ । नभं ॥

पृथकि धो वा ॥ १८८ ॥

पृथक्शब्दे थस्य धो वा भवति ॥ पिधं पुधं । पिहं पुहं ॥

शृङ्खले खः कः ॥ १८९ ॥

शृङ्खले खस्य को भवति ॥ सङ्कलं ॥

[illegible]

पुन्नाग-भागिन्योर्गो मः ॥ १९० ॥

अनयोर्गस्य मो भवति ॥ पुन्नामाइं वसन्ते । भामिणी ॥

छागे लः ॥ १९१ ॥

छागे गस्य लो भवति ॥ छालो । छाली ॥

ऊत्वे दुर्भग-सुभगे वः ॥ १९२ ॥

अनयोरूत्वे गस्य वो भवति ॥ दूहवो । सूहवो ॥ ऊत्व इति किम् । दुहओ । सुहओ ॥

खचित-पिशाचयोश्चः स-ल्लौ वा ॥ १९३ ॥

अनयोश्चस्य यथासंख्यं स ल्ल इत्यादेशौ वा भवतः ॥ खसिओ खइओ । पिसल्लो पिसाओ ॥

जटिले जो झो वा ॥ १९४ ॥

जटिले जस्य झो वा भवति ॥ झडिलो जडिलो ॥

टो डः ॥ १९५ ॥

स्वरात्परस्यासंयुक्तस्यानादेष्टस्य डो भवति ॥ नडो । भडो । घडो । घडइ । स्वरादित्येव । घंटा ॥ असंयुक्तस्येत्येव । खट्टा ॥ अनादेरित्येव । टक्को ॥ क्वचिन्न भवति । अटति । अटइ ॥

सटा-शकट-कैटभे ढः ॥ १९६ ॥

एषु टस्य ढो भवति ॥ सढा । सयढो । केढवो ॥

स्फटिके लः ॥ १९७ ॥

स्फटिके टस्य लो भवति ॥ फलिहो ॥

चपेटा-पाटौ वा ॥ १९८ ॥

चपेटाशब्दे ण्यन्ते च पटि धातौ टस्य लो वा भवति ॥ चविला चविडा । फालेइ फाडेइ ॥

[illegible]

ठो ढः ॥ १९९ ॥

स्वरात्परस्यासंयुक्तस्यानादेष्ठस्य ढो भवति ॥ मढो । सढो । कमढो । कुढारो । पढइ ॥ स्वरादित्येव । वेकुंठो ॥ असंयुक्तस्येत्येव । चिट्ठइ ॥ अनादेरित्येव । हिअए ठाइ ॥

अङ्कोठे ल्लः ॥ २०० ॥

अङ्कोठे ठस्य द्विरुक्तो लो भवति ॥ अंकोल्लतेल्ल-तुप्पं ॥

पिठरे हो वा रश्च डः ॥ २०१ ॥

पिठरे ठस्य हो वा भवति तत्संनियोगे च रस्य डो भवति ॥ पिहडो । पिढरो ॥

डो लः ॥ २०२ ॥

स्वरात्परस्यासंयुक्तस्यानादेर्डस्य प्रायो लो भवति ॥ वडवामुखम् । वलयामुहं । गरुलो । तलायं । कीलइ ॥ स्वरादित्येव । मोंडं । कोंडं ॥ असंयुक्तस्येत्येव । खग्गो ॥ अनादेरित्येव । रमइ डिम्भो ॥ प्रायोग्रहणात् क्वचिद् विकल्पः । बलिसं बडिसं । दालिमं दाडिमं । गुलो गुडो । णाली णाडी । णलं णडं । आमेलो आवेडो ॥ क्वचिन्न भवति । निबिडं । गउडो । पीडिअं । नीडं । उडू । तडी ॥

वेणौ णो वा ॥ २०३ ॥

वेणौ णस्य लो वा भवति ॥ वेलू वेणू ॥

तुच्छे तश्चछौ वा ॥ २०४ ॥

तुच्छशब्दे तस्य च छ इत्यादेशौ वा भवतः ॥ चुच्छं छुच्छं तुच्छं ॥

तगर-त्रसर-तूवरे टः ॥ २०५ ॥

एषु तस्य टो भवति ॥ टगरो । टसरो । टूवरो ॥

प्रत्यादौ डः ॥ २०६ ॥

प्रत्यादिषु तस्य डो भवति ॥ पडिवन्नं । पडिहासो । पडिहारो । पाडिप्फद्धी । पडिसारो । पडिनिअत्तं । पडिमा । पडिवया । पडंसुआ । पडिकरइ । पहुडि । पाहुडं । वावडो । पडाया । बहेडओ । हरडई । मडयं ॥ आर्षे । दुष्कृतम् । दुक्कडं ॥ सुकृतम् । सुकडं ॥ आहृतम् । आहडं ॥ अवहृतम् । अवहडं । इत्यादि ॥ प्राय इत्येव । प्रतिसमयम् । पइसमयं ॥ प्रतीपम् । पईवं ॥ संप्रति । संपइ ॥ प्रतिष्ठानम् । पइट्ठाणं ॥ प्रतिष्ठा । पइट्ठा ॥ प्रतिज्ञा । पइण्णा ॥ प्रति । प्रभृति । प्राभृत । व्यापृत । पताका । बिभीतक । हरीतकी । मृतक । इत्यादि ॥

इत्वे वेतसे ॥ २०७ ॥

वेतसे तस्य डो भवति इत्वे सति ॥ वेडिसो ॥ इत्व इति किम् । वेअसो ॥ इः स्वप्नादौ [१.४६] इति इकारो न भवति इत्व इति व्यावृत्तिबलात् ॥

गर्भितातिमुक्तके णः ॥ २०८ ॥

अनयोस्तस्य णो भवति ॥ गब्भिणो । अणिउँतयं ॥ क्वचिन्न भवत्यपि । अइमुत्तयं ॥ कथम् एरावणो । ऐरावणशब्दस्य । एरावओ इति तु ऐरावतस्य ॥

रुदिते दिना ण्णः ॥ २०९ ॥

रुदिते दिना सह तस्य द्विरुक्तो णो भवति ॥ रुण्णं ॥ अत्र केचिद् ऋत्वादिषु द इत्यारब्धवन्तः स तु शौरसेनीमागधीविषय एव दृश्यते इति नोच्यते । प्राकृते हि । ऋतुः । रिऊ । उऊ ॥ रजतम् । रययं ॥ एतद् । एअं ॥ गतः । गओ ॥ आगतः । आगओ ॥ सांप्रतम् । संपयं ॥ यतः । जओ ॥ ततः । तओ ॥ कृतम् । कयं ॥

---

१ P °तो [illegible] B °तो [illegible] । [illegible]. २ P [illegible].

हृतम् । हयं ॥ हताशः । हयासो ॥ श्रुतः । सुओ ॥ आकृतिः । आकिई ॥ निर्वृतः । निव्वुओ ॥ तातः । ताओ ॥ कतरः । कयरो ॥ द्वितीयः । दुइओ इत्यादयः प्रयोगा भवन्ति । न पुनः उदू रयादि ॥ क्वचित् भावेपि व्यत्ययश्च [४.४४७] इत्येव सिद्धम् । दिही इत्येतदर्थं तु धृतेर्दिहिः [२.१३१] इति वक्ष्यामः ॥

सप्ततौ रः ॥ २१० ॥

सप्ततौ तस्य रो भवति ॥ सत्तरी ॥

अतसी-सातवाहने लः ॥ २११ ॥

अनयोस्तस्य लो भवति ॥ अलसी । सालाहणो । सालवाहणो । सालाहणी भासा ॥

पलिते वा ॥ २१२ ॥

पलिते तस्य लो वा भवति ॥ पलिलं । पलिअं ॥

पीते वो ले वा ॥ २१३ ॥

पीते तस्य वो वा भवति स्वार्थलकारे परे ॥ पीवलं । पीअलं ॥ ल इति किम् । पीअं ॥

वितस्ति-वसति-भरत-कातर-मातुलिङ्गे हः ॥ २१४ ॥

एषु तस्य हो भवति ॥ विहत्थी । वसही ॥ बहुलाधिकारात् क्वचिन्न भवति । वसई ॥ भरहो । काहलो । माहुलिङ्गं । मातुलुङ्गशब्दस्य तु माउलुङ्गं ॥

मेथि-शिथिर-शिथिल-प्रथमे थस्य ढः ॥ २१५ ॥

एषु थस्य ढो भवति ॥ मेढी । सिढिरो । सिढिलो । पढमो ॥

निशीथ-पृथिव्योर्वा ॥ २१६ ॥

नयोस्थस्य ढो वा भवति ॥ निसीढो । निसीहो । पुढवी । पुहवी ॥

दशन-दष्ट-दग्ध-दोला-दण्ड-दर-दाह-दम्भ-दर्भ-कदन-दोहदे दो वा डः ॥ २१७ ॥

एषु दस्य डो वा भवति ॥ डसणं दसणं । डट्ठो दट्ठो । डड्ढो दड्ढो । डोला दोला । डण्डो दण्डो । डरो दरो । डाहो दाहो । डम्भो दम्भो । डब्भो दब्भो । कडणं कयणं । डोहलो दोहलो ॥ दरशब्दस्य च भयार्थवृत्तेरेव भवति । अन्यत्र दर-दलिअं ॥

दंश-दहोः ॥ २१८ ॥

अनयोर्धात्वोर्दस्य डो भवति । डसइ । डहइ ॥

संख्या-गद्गदे रः ॥ २१९ ॥

संख्यावाचिनि गद्गदशब्दे च दस्य रो भवति ॥ एआरह । बारह । तेरह । गग्गरं ॥ अनादेरित्येव । ते दस ॥ असंयुक्तस्येत्येव ॥ चउद्दह ।

कदल्यामद्रुमे ॥ २२० ॥

कदलीशब्दे अद्रुमवाचिनि दस्य रो भवति ॥ करली । अद्रुम इति किम् । कयली । केली ॥

प्रदीपि-दोहदे लः ॥ २२१ ॥

प्रपूर्वे दीप्यतौ धातौ दोहदशब्दे च दस्य लो भवति । पलीवेइ । पलित्तं । दोहलो

कदम्बे वा ॥ २२२ ॥

कदम्बशब्दे दस्य लो वा भवति । कलम्बो । कयम्बो ।

[illegible]

व्याकरण-प्राकारागते कगोः ॥ २६८ ॥

एषु को गश्च सस्वरस्य लुग् वा भवति ॥ वारणं वायरणं । पारो पायारो ॥ आओ आगओ ॥

किसलय-कालायस-हृदये यः ॥ २६९ ॥

एषु सस्वरयकारस्य लुग् वा भवति ॥ किसलं किसलयं । कालासं । महण्णव-समा सहिआ । जाला ते सहिअएहिं न्ति । निसमणुप्पिअ-हिअस्स हिअयं ॥

दुर्गादेव्युदुम्बर-पादपतन-पादपीठन्तर्दः ॥ २७० ॥

एषु सस्वरस्य दकारस्य अन्तर्मध्ये वर्तमानस्य लुग् वा भवति । दुग्गा-वी । दुग्गा-एवी । उम्बरो उउम्बरो । पा-वडणं पाय-वडणं । पा-वीढं ॥ पाय-वीढं ॥ अन्तरिति किम् । दुर्गादेव्यामादौ मा भूत्

यावत्तावज्जीवितावर्तमानावट-प्रावारक-देवकुलैवमेवे वः ॥

यावदादिषु सस्वरवकारस्यान्तर्वर्तमानस्य लुग् वा भवति । जा जाव । ता ताव । जीअं जीविअं । अत्तमाणो आवत्तमाणो । अडो अवडो । पारओ पावारओ । दे-उलं देव-उलं । एमेव एवमेव । अन्तरित्येव । एवमेवेऽन्त्यस्य न भवति ।

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधान-
स्वोपज्ञशब्दानुशासनवृत्तौ अष्टमस्याध्यायस्य प्रथमः पादः ॥

यद्दोर्मण्डलकुण्डलीकृतधनुर्दण्डेन सिद्धाधिप
क्रीतं वैरिकुलात्त्वया किल दलत्कुन्दावदातं यशः ।
भ्रान्त्वा त्रीणि जगन्ति खेदविवशं तन्मालवीनां व्यधा
दापाण्डौ स्तनमण्डले च धवले गण्डस्थले च स्थितिम् ॥

अर्ह ॥ संयुक्तस्य ॥ १ ॥

अधिकारोयं ज्यायामीत् [२.११५] इति यावत् । यदित ऊर्ध्वमनुक्रमिष्यामस्तत्संयुक्तस्येति वेदितव्यम् ॥

शक्त-मुक्त-दष्ट-रुग्ण-मृदुत्वे को वा ॥ २ ॥

एषु संयुक्तस्य को वा भवति ॥ सक्को सत्तो । मुक्को मुत्तो । डक्को दट्ठो । लुक्को लुग्गो । माउक्कं माउत्तणं ॥

क्षः खः क्वचित्तु छ-झौ ॥ ३ ॥

क्षस्य खो भवति । क्वचित्तु छझावपि ॥ खओ । लक्खणं ॥ क्वचित्तु [illegible] । खीणं । छीणं । झीणं । झिज्जइ ॥

ष्क-स्कयोर्नाम्नि ॥ ४ ॥

अनयोर्नाम्नि संज्ञायां खो भवति ॥ ष्क । पोक्खरं । पोक्खरिणी । निक्खं ॥ स्क । खन्धो । खन्धावारो । अवक्खन्दो ॥ नाम्नीति किम् । दुक्करं । निक्कम्पं । निक्कओ । नमोक्कारो । सक्कयं । सक्कारो । तक्करो ॥

शुष्क-स्कन्दे वा ॥ ५ ॥

अनयोः ष्कस्कयोः खो वा भवति ॥ सुक्खं सुक्कं । खन्दो कन्दो ॥

क्ष्वेटकादौ ॥ ६ ॥

क्ष्वेटकादिषु संयुक्तस्य खो भवति । खेडओ । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] ।

स्थाणावहरे ॥ ७ ॥

स्थाणौ संयुक्तस्य खो भवति हरश्चेद् वाच्यो न भवति ॥ खाणू ॥
अहर इति किम् । थाणुणो रेहा ॥

स्तम्भे स्तो वा ॥ ८ ॥

स्तम्भशब्दे स्तस्य खो वा भवति ॥ खम्भो । थम्भो । काष्ठादिमयः ॥

थ-ठावस्पन्दे ॥ ९ ॥

स्पन्दाभाववृत्तौ स्तम्भे स्तस्य थठौ भवतः ॥ थम्भो । ठम्भो ॥ स्त
म्भ्यते । थम्भिज्जइ । ठम्भिज्जइ ॥

रक्ते गो वा ॥ १० ॥

रक्तशब्दे संयुक्तस्य गो वा भवति ॥ रग्गो रत्तो ॥

शुल्के ङ्गो वा ॥ ११ ॥

शुल्कशब्दे संयुक्तस्य ङ्गो वा भवति ॥ सुङ्गं सुक्कं ॥

कृत्ति-चत्वरे चः ॥ १२ ॥

अनयोः संयुक्तस्य चो भवति । किच्ची । चच्चरं ।

त्योऽचैत्ये ॥ १३ ॥

चैत्यवर्जिते त्यस्य चो भवति । सच्चं । पच्चओ ॥ अचैत्य इति किम् ।
चइत्तं ।

प्रत्यूषे षश्च हो वा ॥ १४ ॥

प्रत्यूषे त्यस्य चो भवति तत्संनियोगे च षस्य हो वा भवति ।
पच्चूहो । पच्चूसो ।

त्व-थ्व-द्व-ध्वां च-छ-ज-झाः क्वचित् ॥ १५ ॥

एषां यथासंख्यमेते क्वचिद् भवन्ति । भुक्त्वा । भोच्चा । [illegible]
[illegible]

[illegible]

त ॥ श्रुत्वा । सोच्चा ॥ पृथ्वी । पिच्छी ॥ विद्वान् । विज्जं ॥ बु-
[ध्वा] । बुज्झा ॥

भोच्चा सयलं पिच्छिं विज्जं बुज्झा अणण्णय-ग्गामिं ।
चइऊण तवं काउं सन्ती पत्तो सिवं परमं ॥

वृश्चिके श्चेर्ञ्चुर्वा ॥ १६ ॥

वृश्चिके श्चेः सस्वरस्य स्थाने ञ्चुरादेशो वा भवति । छापवादः ॥
विञ्चुओ विंचुओ । पक्षे । विंछिओ ॥

छोऽक्ष्यादौ ॥ १७ ॥

अक्ष्यादिषु संयुक्तस्य छो भवति । खस्यापवादः ॥ अच्छि । उच्छू ।
लच्छी । कच्छो । छीअं । छीरं । सरिच्छो । वच्छो । मच्छिआ ।
छेत्तं । छुहा । दच्छो । कुच्छी । वच्छं । छुण्णो । कच्छा । छारो ।
कुच्छेअयं । छुरो । उच्छा । छयं । सारिच्छं ॥ अक्षि । इक्षु ।
लक्ष्मी । कक्ष । क्षुत । क्षीर । सदृक्ष । वृक्ष । मक्षिका । क्षेत्र ।
क्षुध् । दक्ष । कुक्षि । वक्षस् । क्षुण्ण । कक्षा । क्षार । कौक्षेयक ।
क्षुर । उक्षन् । क्षत । सादृश्य ॥ क्वचित् स्थगितशब्देपि । छइअं ॥
आर्षे । इक्खू । खीरं । सारिक्खमित्याद्यपि दृश्यते ॥

क्षमायां कौ ॥ १८ ॥

कौ पृथिव्यां वर्तमाने क्षमाशब्दे संयुक्तस्य छो भवति । छमा पृ-
थिवी । लाक्षणिकस्यापि क्ष्मादेशस्यापि भवति । क्ष्मा । छमा ॥ का-
वितिकिम् । खमा क्षान्तिः ॥

ऋक्षे वा ॥ १९ ॥

ऋक्षशब्दे संयुक्तस्य छो वा भवति । रिच्छं । रिक्खं । रिच्छो ।
रिक्खो । कथं छूढं क्षिप्तं । वृक्षक्षिप्तयो रुक्खछूढौ [२.१२७]
इति भविष्यति ।

[illegible]

साध्वस-ध्य-ह्यां झः ॥ २६ ॥

साध्वसे संयुक्तस्य ध्यह्योश्च झो भवति ॥ सज्झसं ॥ ध्य । बज्झए । झाणं । उवज्झाओ । सज्झाओ । सज्झं । विज्झो ॥ ह्य । सज्झो । मज्झं । गुज्झं । णज्झइ ॥

ध्वजे वा ॥ २७ ॥

ध्वजशब्दे संयुक्तस्य झो वा भवति ॥ झओ धओ ॥

इन्धौ झा ॥ २८ ॥

इन्धौ धातौ संयुक्तस्य झा इत्यादेशो भवति । समिज्झाइ । विज्झाइ ॥

वृत्त-प्रवृत्त-मृत्तिका-पत्तन-कदर्थिते टः ॥ २९ ॥

एषु संयुक्तस्य टो भवति ॥ वट्टो । पयट्टो । मट्टिआ । पट्टणं । कवट्टिओ ॥

र्तस्याधूर्तादौ ॥ ३० ॥

र्तस्य टो भवति धूर्तादीन् वर्जयित्वा ॥ केवट्टो । वट्टी । जट्टो । पयट्टइ । वट्टुलं । रायवट्टयं । नट्टई । संवट्टिअं । अधूर्तादाविति किम् । धुत्तो । कित्ती । वत्ता । आवत्तणं । निवत्तणं । पवत्तणं । संवत्तणं । आवत्तओ । निवत्तओ । निव्वत्तओ । पवत्तओ । संवत्तओ । वत्तिआ । वत्तिओ । कत्तिओ । उक्कत्तिओ । कत्तरी । मुत्ती । मुत्तो । मुहुत्तो । बहुलाधिकाराद् वट्टा ॥ धूर्त । कीर्ति । वार्ता । आवर्तन । निवर्तन । प्रवर्तन । संवर्तन । आवर्तक । निवर्तक । निर्वर्तक । प्रवर्तक । संवर्तक । वर्तिका । वार्तिक । कार्तिक । उत्कर्तित । कर्तरि । मूर्ति । मूर्त । मुहूर्त ॥

[illegible]

वृन्ते ण्टः ॥ ३१ ॥

वृन्ते संयुक्तस्य ण्टो भवति ॥ वेण्टं । तालवेण्टं ॥

ठोस्थि-विसंस्थुले ॥ ३२ ॥

अनयोः संयुक्तस्य ठो भवति ॥ अट्ठी । विसंठुलं ॥

स्त्यान-चतुर्थार्थे वा ॥ ३३ ॥

एषु संयुक्तस्य ठो वा भवति ॥ ठीणं थीणं । चउट्ठो । अट्ठो प्रयोजनम् । अत्थो धनम् ॥

ष्टस्यानुष्ट्रेष्टासंदष्टे ॥ ३४ ॥

उष्ट्रादिवर्जिते ष्टस्य ठो भवति ॥ लट्ठी । मुट्ठी । दिट्ठी । सिट्ठी । पुट्ठो । कट्ठं । सुरट्ठा । इट्ठो । अणिट्ठं ॥ अनुष्ट्रेष्टासंदष्ट इति किम् । उट्टो । इट्टाचुण्णं व्व । संदट्टो ॥

गर्ते डः ॥ ३५ ॥

गर्तशब्दे संयुक्तस्य डो भवति । टापवादः ॥ गड्डो । गड्डा ॥

सम्मर्द-वितर्दि-विच्छर्द-च्छर्दि-कपर्द-मर्दिते र्दस्य ॥ ३६ ॥

एषु र्दस्य डत्वं भवति ॥ सम्मड्डो । विअड्डी । विच्छड्डो । छड्डइ । छड्डी । कवड्डो । मड्डिओ । सम्मड्डिओ ॥

गर्दभे वा ॥ ३७ ॥

गर्दभे र्दस्य डो वा भवति ॥ गड्डहो । गद्दहो ॥

कन्दरिका-भिन्दिपाले ण्डः ॥ ३८ ॥

अनयोः संयुक्तस्य ण्डो भवति ॥ कण्डलिआ । भिण्डिवालो ॥

स्तब्धे ठ-ढौ ॥ ३९ ॥

स्तब्धे संयुक्तयोर्यथाक्रमं ठढौ भवतः ॥ ठड्ढो ॥

---

१ B °न्ते ण्टो २ B ढां ३ B °ड्डो । छड्डी

क-ग-ट-ड-त-द-प-श-ष-स-×क-×पामूर्ध्वं लुक् ॥ ७७ ॥

एषां संयुक्तवर्णसंबन्धिनामूर्ध्वं स्थितानां लुग् भवति ॥ क । भुत्तं । सित्थं ॥ ग । दुद्ध । मुद्धं ॥ ट । षट्पदः । छप्पओ ॥ कट्फलं । कप्फलं ॥ ड । खड्गः । खग्गो ॥ षड्जः । सज्जो ॥ त । उप्पलं । उप्पाओ ॥ द । मद्गुः । मग्गू । मोग्गरो ॥ प । सुत्तो । गुत्तो ॥ श । लण्हं । निच्चलो । चुअइ ॥ ष । गोट्ठी । छट्ठो । निट्ठुरो ॥ स । खलिओ । नेहो ॥ ×क । दु×खम् । दुक्खं ॥ ×प । अंत×पातः । अंतप्पाओ ॥

अधो म-न-याम् ॥ ७८ ॥

मनयां संयुक्तस्याधो वर्तमानानां लुग् भवति ॥ म । जुग्गं । रस्सी । सरो । सेरं ॥ न । नग्गो । लग्गो ॥ य । सामा । कुड्डं । वाहो ॥

सर्वत्र ल-ब-रामवन्द्रे ॥ ७९ ॥

वन्द्रशब्दादन्यत्र लबरां सर्वत्र संयुक्तस्योर्ध्वमधश्च स्थितानां लुग् भवति ॥ ऊर्ध्वं ॥ ल । उल्का । उक्का ॥ वल्कलम् । वक्कलं ॥ ब । शब्दः । सद्दो ॥ अब्दः । अद्दो ॥ लुब्धकः । लोद्धओ ॥ र । अर्कः । अक्को ॥ वर्गः । वग्गो ॥ अधः । श्लक्ष्णम् । सण्हं ॥ विक्लवः । विक्कवो ॥ पक्वम् । पक्कं पिक्कं ॥ ध्वस्तः । धत्थो ॥ चक्रम् । चक्कं ॥ ग्रहः । गहो ॥ रात्रिः । रत्ती ॥ अत्र द्व इत्यादिसंयुक्तानामुभयप्राप्तौ यथादर्शनं लोपः ॥ क्वचिदूर्ध्वम् । उद्विग्नः । उव्विग्गो ॥ द्विगुणः । बि-उणो ॥ द्वितीयः । बीओ ॥ कल्मषम् । कम्मसं ॥ सर्वं । सव्वं ॥ शुल्वम् । सुब्बं ॥ क्वचित्त्वधः । काव्यम् । कव्वं ॥ कुल्या । कुल्ला ॥ माल्यम् । मल्लं ॥ द्विपः । दिओ ॥ द्विजातिः । दुआई ॥ क्वचित्पर्यायेण । द्वारम् । बारं । दारं ॥ उद्विग्नः । उव्विग्गो । उव्विग्गो ॥ अवन्द्र इति किम् । वन्द्रं । संस्कृतसमोयं प्राकृतशब्दः । अत्रोत्तरेण विकल्पोपि न भवति निषेधसामर्थ्यात् ॥

१ B क । मुक्त । मु°. २ B °त्त । निश्च । नि° ३ A उपअो ४ P वन्द्रे B वर्द्रे, B °वन्द्रे. ५ P वन्द्र°. B चद्र°. ६ B पक्व । पि° ७ P अवन्द्र° ८ P वन्द्रे. B चंद्रे.

श्चो हरिश्चन्द्रे ॥ ८७ ॥

हरिश्चन्द्रशब्दे श्च इत्यस्य लुग् भवति ॥ हरिअन्दो ॥

रात्रौ वा ॥ ८८ ॥

रात्रिशब्दे संयुक्तस्य लुग् वा भवति ॥ राई रत्ती ॥

अनादौ शेषादेशयोर्द्वित्वम् ॥ ८९ ॥

पदस्यानादौ वर्तमानस्य शेषस्यादेशस्य च द्वित्वं भवति ॥ शेष
कप्पतरू । भुत्तं । दुद्धं । नग्गं । उक्का । अक्को । मुक्खो ॥ आदेश
डक्को । जक्खो । रग्गो । किच्ची । रुप्पी ॥ क्वचिन्न भवति ।
सिणो ॥ अनादाविति किम् । खलिअं । थेरो । खम्भो ॥ द्वयोः
द्वित्वमस्त्येवेति न भवति । विञ्चुओ । भिण्डिवालो ॥

द्वितीय-तुर्ययोरुपरि पूर्वः ॥ ९० ॥

द्वितीयतुर्ययोर्द्वित्वप्रसङ्गे उपरि पूर्वौ भवतः ॥ द्वितीयस्योपरि प्रथम
श्चतुर्थस्योपरि तृतीय इत्यर्थः ॥ शेष । वक्खाणं । वग्घो । मुच्छा ।
निज्झरो । कट्ठं । तित्थं । निद्धणो । गुप्फं । निब्भरो ॥ आदेश
जक्खो ॥ घस्य नास्ति ॥ अच्छी । मज्झं । पट्ठी । वुड्ढो । हत्थो ।
आलिद्धो । पुप्फं । भिब्भलो ॥ तैलादौ [२.९८] द्वित्वे ओक्खलं ॥
सेवादौ [२.९९] नक्खा । नहा ॥ समासे । कइद्धओ कइधओ
द्वित्व इत्येव । खाओ ॥

दीर्घे वा ॥ ९१ ॥

दीर्घशब्दे शेषस्य घस्य उपरि पूर्वो वा भवति ॥ दिग्घो दीहो ॥

न दीर्घानुस्वारात् ॥ ९२ ॥

दीर्घानुस्वाराभ्यां लाक्षणिकाभ्यामलाक्षणिकाभ्यां च परयोः शेष
देशयोर्द्वित्वं न भवति ॥ झूडो । नीसासो । फासो ॥ अलाक्षणिक ।

---

१ A °श्री ॥ २ B निब्भरो. ३ B निज्झरो ४ P उक्ख° ५ B सेवादि°
६ B °णिक

ललाटे च [१.२५७.] इति आदेर्लस्य णविधानादिह द्वितीयो स्थानी ॥

हो ह्योः ॥ १२४ ॥

ह्यशब्दे हकारयकारयोर्व्यत्ययो वा भवति ॥ गुह्यम् । गुय्हं गुज्झं सह्यः । सय्हो सज्झो ॥

स्तोकस्य थोक्क-थोव-थेवाः ॥ १२५ ॥

स्तोकशब्दस्य एते त्रय आदेशा भवन्ति वा ॥ थोक्कं थोवं थेवं पक्षे । थोअं ॥

दुहितृ-भगिन्योर्धूआ-बहिण्यौ ॥ १२६ ॥

अनयोरेतावादेशौ वा भवतः ॥ धूआ दुहिआ । बहिणी भइणी ॥

वृक्ष-क्षिप्तयो रुक्ख-छूढौ ॥ १२७ ॥

वृक्षक्षिप्तयोर्यथासंख्यं रुक्ख छूढ इत्यादेशौ वा भवतः ॥ [illegible] वच्छो । छूढं खित्तं । उच्छूढं । उक्खित्तं ॥

वनिताया विलया ॥ १२८ ॥

वनिताशब्दस्य विलया इत्यादेशो वा भवति ॥ [illegible] विलयेतिसंस्कृतेपीति केचित् ॥

गौणस्येषतः कूरः ॥ १२९ ॥

ईषच्छब्दस्य गौणस्य कूर इत्यादेशो वा भवति ॥ [illegible] पक्षे । ईसि ॥

स्त्रिया इत्थी ॥ १३० ॥

स्त्रीशब्दस्य इत्थी इत्यादेशो वा भवति ॥ इत्थी थी ॥

धृतेर्दिहिः ॥ १३१ ॥

धृतिशब्दस्य दिहिरित्यादेशो वा भवति ॥ दिही धिई ॥

[illegible]

छुमं । छिक्को छुत्तो ॥ आरब्धे । आढत्तो आरद्धो ॥ पदाति
इक्को पयाई ॥

दंष्ट्राया दाढा ॥ १३९ ॥

पृथग्योगाद्वेति निवृत्तम् । दंष्ट्राशब्दस्य दाढा इत्यादेशो
दाढा । अयं संस्कृतेपि ॥

बहिसो बाहिं-बाहिरौ ॥ १४० ॥

बहिःशब्दस्य बाहिं बाहिर इत्यादेशौ भवतः ॥

अधसो हेट्ठं ॥ १४१ ॥

अधस्‌शब्दस्य हेट्ठ इत्ययमादेशो भवति ॥ हेट्ठं ॥

मातृ-पितुः स्वसुः सिआ-छौ ॥ १४२ ॥

मातृपितृभ्यां परस्य स्वसृशब्दस्य सिआ छा
माउ-सिआ । माउ-च्छा । पिउ-सिआ । पिउ-च्छा ॥

तिर्यचस्तिरिच्छिः ॥ १४३ ॥

तिर्यच्‌शब्दस्य तिरिच्छिरित्यादेशो भवति ॥ तिरिच्छि
आर्षे तिरिआ इत्यादेशोपि । तिरिआ ॥

गृहस्य घरोपतौ ॥ १४४ ॥

गृहशब्दस्य घर इत्यादेशो भवति पतिशब्दश्चेत् परो न
घरो । घर-सामी । रायं-हरं ॥ अपताविति किम् । गह-वई ॥

शीलाद्यर्थस्येरः ॥ १४५ ॥

शीलधर्मसाध्वर्थे विहितस्य प्रत्ययस्य इर इत्यादेशो भवति ॥
नशीलः हसिरो । रोविरो । लज्जिरो । जम्पिरो । वेविरो ।
ऊससिरो ॥ केचित् तृन एव इरमाहुस्तेषां नमिरगमिरादयो
सिध्यन्ति । तृनोत्र रादिना बाधितत्वात् ॥

१ P छुरं. २ P आरब्ध. ३ P B पदाति. ४ A पायक्को. ५ I
६ P B इत्यादे°. ७ B तिर्यच°. ८ P °च्छि इत्या°. ९ A तिरिअ

पथो णस्येकट् ॥ १५२ ॥

नित्यं णः पन्थश्च [हे० ६.४] इति यः पथो णो विहितस्तस्य इकट् भवति ॥ पान्थः । पहिओ ॥

ईयस्यात्मनो णयः ॥ १५३ ॥

आत्मनः परस्य ईयस्य णय इत्यादेशो भवति ॥ आत्मीयम् । अप्पणयं ॥

८।२।१५४

त्वस्य डिमा-त्तणौ वा ॥ १५४ ॥

त्वप्रत्ययस्य डिमा त्तण इत्यादेशौ वा भवतः ॥ पीणिमा । पुप्फिमा । पीणत्तणं । पुप्फत्तणं । पक्षे । पीणत्तं । पुप्फत्तं ॥ इम्नः पृथ्व्यादिषु नियतत्वात् तदन्यप्रत्ययान्तेषु अस्य विधिः ॥ पीनता इत्यस्य प्राकृते पीणया इति भवति । पीणदा इति तु भाषान्तरे । तेनेह तलो दा न क्रियते ॥

अनङ्कोठात्तैलस्य डेल्लः ॥ १५५ ॥

अङ्कोठवर्जिताच्छब्दात्परस्य तैलप्रत्ययस्य डेल्ल इत्यादेशो भवति ॥ सुरहि-जलेण कडुएल्लं ॥ अनङ्कोठादिति किम् । अङ्कोल्लतेल्लं ॥

यत्तदेतदोतोरित्तिअ एतल्लुक् च ॥ १५६ ॥

एभ्यः परस्य डावादेरतोः परिमाणार्थस्य इत्तिअ इत्यादेशो भवति एतदो लुक् च ॥ यावत् । जित्तिअं । तावत् । तित्तिअं ॥ एतावत् । इत्तिअं ॥

इदंकिमश्च डेत्तिअ-डेत्तिल-डेद्दहाः ॥ १५७ ॥

इदंकिम्भ्यां यत्तदेतद्भ्यश्च परस्यातोर्डावतोर्वा डित् एत्तिअ एत्तिल एद्दह इत्यादेशा भवन्ति एतल्लुक् च ॥ इयत् । एत्तिअं । एत्तिलं । एद्दहं ॥ कियत् । केत्तिअं । केत्तिलं । केद्दहं ॥ यावत् । जेत्तिअं ।

[illegible]
[illegible]
[illegible]

वैकादः सि सिअं इआ ॥ १६२ ॥

एकशब्दात्परस्य दाप्रत्ययस्य सि सिअं इआ इत्यादेशा वा भवन्ति[1]। एकदा । एकसि । एकसिअं । एकइआ[2]। पक्षे । एगया ॥

डिल्ल-डुल्लौ भवे ॥ १६३ ॥

भवेर्थे नाम्नः परौ इल्ल उल्ल इत्येतौ ड्रितौ प्रत्ययौ भवतः ॥ गामिल्लिआ । पुरिल्लं । हेट्ठिल्लं । उवरिल्लं । अप्पुल्लं ॥ आल्वालावपीच्छन्त्यन्ये ॥

स्वार्थे कश्च वा ॥ १६४ ॥

स्वार्थे कश्चकारादिल्लोल्लौ डितौ प्रत्ययौ वा भवतः ॥ क । कुङ्कुमपिञ्जरयं । चन्दओ । गयणयम्मि । धरणीहर-पक्खुब्भन्तयं । दुहिअगम-हिअयए[3]। इहयं । आलेट्ठुअं । आश्लेष्टुमित्यर्थः ॥ द्विरपि भवति । बहुअयं ॥ ककारोच्चारणं पैशाचिकभाषार्थम् । यथा । वतनके वतनकं समप्पेत्तून ॥ इल्ल । निज्जिआसोअ-पल्लविल्लेण । पुरिल्लो । पुरो वा ॥ उल्ल । मह पिउल्लओ । मुहुल्लं । हत्थुल्ला । पक्षे । चन्दो । गयणं । इह । आलेट्ठुं । बहु । बहुअं । मुहं । हत्था ॥ कुत्सादिविशिष्टे तु संस्कृतवदेव कप् सिद्धः ॥ यावादिलक्षण क. प्रतिनियतविषय एवेति वचनम् ॥

ल्लो नवैकाद्वा ॥ १६५ ॥

आभ्यां स्वार्थे संयुक्तो ल्लो वा भवति ॥ नवल्लो । एकल्लो ॥ सेवादित्वात् कस्य द्वित्वे एक्कल्लो । पक्षे । नवो । एक्को । एओ ॥

उपरेः संव्याने ॥ १६६ ॥

संव्यानेर्थे वर्तमानादुपरिशब्दात् स्वार्थे ल्लो भवति ॥ अवरिल्लो ॥ संव्यान इति किम् । अवरिं ॥

---

१ B इआदेशा २ P °एक्कइआ ३ P °मरमाए° ४ B °मिअय° A ५ P आलेट्ठुअ ६ B °त्तूण ७ P पुरिल्ला ८ A महइ ९ B
१० B °व कसि° P क ११ B °नियत एवे° १२ P ल्लो १३ P अवरि

पात्यन्ते ॥ गौः । गोणो । गावी ॥ गावः । गावीओ ॥ बलीवर्दः । बइल्लो ॥ आपः । आऊ ॥ पञ्चपञ्चाशत् । पञ्चावण्णा । पणपन्ना ॥ त्रिपञ्चाशत् । तेवण्णा । त्रिचत्वारिंशत् । तेआलीसा ॥ व्युत्सर्गः । विउसग्गो ॥ व्युत्सर्जनम् । वोसिरणं ॥ बहिर्मैथुनं वा । बहिद्धा ॥ कार्यम् । णामुक्कसिअं ॥ क्वचित् । कत्थइ ॥ उद्वहति । मुव्वहइ ॥ अपस्मारः । वम्हलो ॥ उत्पलम् । कन्दुट्टं ॥ धिग्धिक् । छिछि । द्धिद्धि ॥ धिगस्तु । धिरत्थु ॥ प्रतिस्पर्धा । पडिसिद्धी । पाडिसिद्धी ॥ स्थासकः । चच्चिक्कं ॥ निलयः । निहेलणं ॥ मघवान् । मघोणो ॥ साक्षी । सक्खिणो ॥ जन्म । जम्मणं ॥ महान् । महन्तो ॥ भवान् । भवन्तो ॥ आशीः । आसीसा ॥ क्वचित् हस्य ड्भौ । बृहत्तरम् । वड्डयरं ॥ हिमोरः । भिमोरो ॥ क्षुल्लस्य ड्डः । क्षुल्लकः । खुड्डओ ॥ घोषाणामग्रेतनो गायनः । घायणो ॥ वडः । वढो ॥ ककुदम् । ककुधं ॥ अकाण्डम् । अत्थक्कं ॥ लज्जावती । लज्जालुइणी ॥ कुतूहलम् । कुड्डं ॥ चूतः । मायन्दो । माकन्दशब्दः संस्कृतेपीत्यन्ये ॥ विष्णुः । भट्टिओ ॥ श्मशानम् । करसी । असुराः । अगया ॥ खेलम् । खेड्डं ॥ पौष्पं रजः । तिङ्गिच्छि ॥ दिनम् । अल्लं ॥ समर्थः । पक्कलो ॥ पण्डकः । णेलच्छो ॥ कर्पासः । पलही ॥ बली । उज्जल्लो ॥ ताम्बूलम् । झसुरं ॥ पुंश्चली । छिछई ॥ शाखा । साहुली । इत्यादि ॥ वाधिकारात्पक्षे यथादर्शनं गउओ इत्याद्यपि भवति ॥ गोला गोआवरी इति तु गोलागोदावरीभ्यां सिद्धम् ॥ भाषाशब्दाश्च । आहित्थ । लल्लक्क । विड्डिर । पच्चड्डिअ । उप्पेहड । मडप्फर । पड्डिच्छिर । अट्टमट्ट । विहडप्फड । उज्जल्ल । हल्लप्फल इत्यादयो महाराष्ट्रविदर्भादिदेशप्रसिद्धा लोकतोवगन्तव्याः ॥

१ B गावा २ A पञ्चावन्ना ३ P पणवण्णा B पणअन्ना ४ B विउस्समो. ५ B ... ६ A पडिसिद्धी। यथा. ७ B °सिद्धा ८ B साखिखणो ९ B आशीना. १० B इ... ११ B इः. १२ P बट. १३ B वडो. १४ P अच्चउक्क १५ B लज्जावती १६ B ... १७ B पइदे. १८ B षंडितः. १९ B उज्जलो. २० B ताम्बूर. २१ P असु. B ... २२ B छिच्छई २३ B आहित्थ. २४ B ललक्क. २५ B पडिहिधर २६ B ...

शब्दाश्च। अवयासइ। फुम्फुल्लइ। उप्फालेइ। इत्यादयः। अतएव च कृष्ट-घृष्ट-वाक्य-विद्वस्-वाचस्पति-विष्टरश्रवस्-प्रचेतस्-प्रोक्त-प्रोतादीनां क्विबादिप्रत्ययान्तानां च अग्निचित्सोमसुत्सुग्लसुम्लेत्यादीनां पूर्वैः कविभिरप्रयुक्तानां प्रतीतिवैषम्यपरः प्रयोगो न कर्तव्यः शब्दान्तरैरेव तु तदर्थोभिधेयः। यथा कृष्टः कुशलः। वाचस्पतिर्गुरुः। विष्टरश्रवा हरिरित्यादि॥ घृष्टशब्दस्य तु सोपसर्गस्य प्रयोग इष्यत एव। मन्दर-यड-परिघट्टं। तद्दिअस-निहट्ठाणङ्ग इत्यादि॥ आर्षे तु यथादर्शनं सर्वमविरुद्धम्। यथा। घट्ठा। मट्ठा। विउसा। सुअ-लक्खणाणुसारेण। वक्कन्तरेसु अ पुणो इत्यादि॥

अव्ययम्॥ १७५॥

अधिकारोयम्। इतः परं ये वक्ष्यन्ते आपादसमाप्तेस्तेव्ययसंज्ञा ज्ञातव्याः॥

तं वाक्योपन्यासे॥ १७६॥

तमिति वाक्योपन्यासे प्रयोक्तव्यम्॥ तं तिअस-बन्दि-मोक्खं॥

आम अभ्युपगमे॥ १७७॥

आमेत्यभ्युपगमे प्रयोक्तव्यम्॥ आम बहला वणोली॥

णवि वैपरीत्ये॥ १७८॥

णवीति वैपरीत्ये प्रयोक्तव्यम्॥ णवि हा वणे॥

पुणरुत्तं कृतकरणे॥ १७९॥

पुणरुत्तमिति कृतकरणे प्रयोक्तव्यम्॥

अइ सुप्पइ पंसुलि णीसहेहिँ अङ्गेहिँ पुणरुत्तं॥

हन्दि विषाद-विकल्प-पश्चात्ताप-निश्चय-सत्ये॥ १८०॥

हन्दि इति विषादादिषु प्रयोक्तव्यम्॥

---

१ B P इअ सुद्द°. २ A हुन्दु°. ३ B °वन्दि°. ४ B °व्वलंगइ. ५ B.

णवरं केवले ॥ १८७ ॥

वलार्थे णवरं इति प्रयोक्तव्यम् ॥ णवरं पिआइं चिअ णिव्वडन्ति॥

आनन्तर्ये णवरि ॥ १८८ ॥

ानन्तर्ये णवरीति प्रयोक्तव्यम् ॥ णवरि अ से रहुवइणा ॥ के-
ग्तु केवलानन्तर्यार्थयोर्णवरणवरि इत्येकमेव सूत्रं कुर्वते तन्मते
मावप्युभयार्थौ ॥

अलाहि निवारणे ॥ १८९ ॥

ालाहीति निवारणे प्रयोक्तव्यम् ॥ अलाहि किं वाइएण लेहेण ॥

अण णाइं नञर्थे ॥ १९० ॥

ाण णाइं इत्येतौ नञोर्थे प्रयोक्तव्यौ ॥ अणचिन्तिअममुणन्ती ।
ाइं करेमि रोसं ॥

माइं मार्थे ॥ १९१ ॥

ाइं इति मार्थे प्रयोक्तव्यम् ॥ माइं काहीअ रोसं । मा कार्षीद् रोषम् ॥

हद्धी निर्वेदे ॥ १९२ ॥

द्धी इत्यव्ययमतएव निर्देशात् हाधिक्शब्दादेशो वा निर्वेदे प्रयो-
क्तव्यम् ॥ हद्धीहद्धी । हा धाहधाह ॥

वेव्वे भय-वारण-विषादे ॥ १९३ ॥

यवारणविषादेषु वेव्वे इति प्रयोक्तव्यम् ॥

वेव्वेत्ति भये वेव्वेत्ति वारणे जूरणे अ वेव्वेत्ति ।
उल्लाविरीइवि तुहं वेव्वेत्ति मयच्छि किं णेअं ॥
किं उल्लावेन्तीए उअ जूरन्तीएँ किं तु भीआए ।
उव्वाडिरीएँ वेव्वेत्ति तीएँ भणिअं न विम्हरिमो ॥

१ [illegible]र्इ. २ P B केवरिं. ३ B निव्वहरि. ४ B [illegible]. ५ A [illegible].
६ P [illegible]. ७ B [illegible]. ८ A [illegible]. ९ A कारिस. १० A [illegible].
११ B [illegible]. १२ A [illegible]. १३ A [illegible]. १४ P [illegible]. १५ B [illegible].

वेव्व च आमन्त्रणे ॥ १९४ ॥

वेव्व वेव्वे च आमन्त्रणे प्रयोक्तव्ये ॥ वेव्व गोले । वेव्वे मुरन्दले वहसि पाणिअं ॥

मामि हला हले सख्या वा ॥ १९५ ॥

एते सख्या आमन्त्रणे वा प्रयोक्तव्याः ॥ मामि सरिसक्खराण वि ॥ पणवह माणस्स हला ॥ हले हयासस्स । पक्षे । सहि एरिसि च्चिअ गई ॥

दे संमुखीकरणे च ॥ १९६ ॥

संमुखीकरणे सख्या आमन्त्रणे च दे इति प्रयोक्तव्यम् ॥ दे पसिअ ताव सुन्दरि ॥ दे आ पसिअ निअत्तसु ॥

हुं दान-पृच्छा-निवारणे ॥ १९७ ॥

हुं इति दानादिषु प्रयुज्यते ॥ दाने । हुं गेण्ह अप्पणो च्चिअ ॥ पृच्छायाम् । हुं साहसु सब्भावं ॥ निवारणे । हुं निल्लज्ज समोसर ॥

हु खु निश्चय-वितर्क-संभावन-विस्मये ॥ १९८ ॥

हु खु इत्येतौ निश्चयादिषु प्रयोक्तव्यौ ॥ निश्चये । तंपि हु अच्छिन्न-सिरी । तं खु सिरीए रहस्सं ॥ वितर्कः ऊहः संशयो वा । ऊहे । न हु णवरं संगहिआ । एअं खु हसइ ॥ संशये । जलहरो खु धूमवडलो खु ॥ संभावने । तरीउं ण हु णवरं इमं । एअं खु हसइ ॥ विस्मये । को खु एसो सहस्स-सिरो ॥ बहुलाधिकारादनुस्वारात्परो हुर्न प्रयोक्तव्यः ॥

ऊ गर्हाक्षेप-विस्मय-सूचने ॥ १९९ ॥

ऊ इति गर्हादिषु प्रयोक्तव्यम् ॥ गर्हा । ऊ णिल्लज्ज ॥ प्रक्रान्तस्य वाक्यस्य विपर्यासाशङ्काया विनिवर्तनलक्षण आक्षेप ॥ ऊ किं मए भणिअं ॥ विस्मये । ऊ कह मुणिआ अहयं ॥ सूचने । ऊ केण न विण्णायं ॥

---

१ B [illegible]. २ B [illegible] । हु [illegible] ३ A [illegible] B [illegible] ४ B [illegible] B [illegible]. ५ B [illegible]. ६ B [illegible] ७ B [illegible]

थू कुत्सायाम् ॥ २०० ॥

थू इति कुत्सायां प्रयोक्तव्यम् ॥ थू निल्लज्जो लोओ ॥

रे अरे संभाषण-रतिकलहे ॥ २०१ ॥

अनयोरर्थयोर्यथासंख्यमेतौ प्रयोक्तव्यौ ॥ रे संभाषणे । रे हिअय मडह-सरिआ ॥ अरे रतिकलहे । अरे मए समं मा करेसु उवहासं ॥

हरे क्षेपे च ॥ २०२ ॥

क्षेपे संभाषणरतिकलहयोश्च हरे इति प्रयोक्तव्यम् ॥ क्षेपे । हरे णिल्लज्ज ॥ संभाषणे । हरे पुरिसा ॥ रतिकलहे । हरे बहु-वल्लह ॥

ओ सूचना-पश्चात्तापे ॥ २०३ ॥

ओ इति सूचनापश्चात्तापयोः प्रयोक्तव्यम् ॥ सूचनायाम् । ओ अविणय-तत्तिल्ले ॥ पश्चात्तापे । ओ न मए छाया इत्तिआए ॥ विकल्पे तु उतादेशेनैवौकारेण सिद्धम् ॥ ओ विरएमि नहयले ॥

अव्वो सूचना-दुःख-संभाषणापराध-विस्मयानन्दादर-भय-खेद-विषाद-पश्चात्तापे ॥ २०४ ॥

अव्वो इति सूचनादिषु प्रयोक्तव्यम् ॥ सूचनायाम् । अव्वो दुक्कर-यारय ॥ दुःखे । अव्वो दलन्ति हिययं ॥ संभाषणे । अव्वो किमिणं किमिणं ॥ अपराधविस्मययोः ।

अव्वो हरन्ति हिअयं तहवि न वेसा हवन्ति जुवईण ।
अव्वो किं पि रहस्सं मुणन्ति धुत्ता जणब्भहिआ ॥

आनन्दादरभयेषु ।

अव्वो सुपहायमिणं अव्वो अज्जम्ह सप्फलं जीअं ।
अव्वो अइअम्मि तुमे नवरं जइ सा न जूरिहिइ ॥

---

१ A थू थू. २ B णिल्लज्ज. ३ A °यह्ह. ४ A °तत्तिल्ले. ५ B °विल्ल ओ अविणय°. ६ [illegible] °. ७ B दुक्क°. ८ B [illegible]. ९ B [illegible]. १० B °यर.

नाम । अहह । हीसि । अयि । अहीह । अरिरिहो इत्यादयस्तु स्कृतसमत्वेन सिद्धाः ॥

प्यादयः ॥ २१८ ॥

प्यादयो नियतार्थवृत्तयः प्राकृते प्रयोक्तव्याः ॥ पि वि अप्यर्थे ॥

इत्याचार्यश्रीहेमचन्द्रसूरिविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनवृत्तौ अष्टमस्याध्यायस्य
द्वितीयः पादः समाप्तः ॥

द्विषत्पुरक्षोदविनोदहेतोर्भवादवामस्य भवद्भुजस्य ।
अयं विशेषो भुवनैकवीर परं न यत्काममपाकरोति ॥ १ ॥

[illegible]

अर्ह । वीप्स्यात्स्यादेर्वीप्स्ये स्वरे मो वा ॥ १ ॥

वीप्सार्थात्पदात्परस्य स्यादेः स्थाने स्वरादौ वीप्सार्थे पदे परे मो वा भवति ॥ एकैकम् । एक्कमेक्कं । एक्कमेक्केण । अङ्गमङ्गे । अङ्गमङ्गम्मि । पक्षे । एक्केक्कमित्यादि ॥

अतः सेर्डोः ॥ २ ॥

अकारान्तान्नाम्नः परस्य स्यादेः सेः स्थाने डो भवति ॥ वच्छो ॥

वैतत्तदः ॥ ३ ॥

एतत्तदोकारात्परस्य स्यादेः सेर्डो वा भवति ॥ एसो एस । सो णरो । स णरो ॥

जस्-शसोर्लुक् ॥ ४ ॥

अकारान्तान्नाम्नः परयोः स्यादिसंबन्धिनोर्जस्-शसोर्लुग् भवति ॥ वच्छा एए । वच्छे पेच्छ ॥

अमोस्य ॥ ५ ॥

अतः परस्यामोकारस्य लुग् भवति ॥ वच्छं पेच्छ ॥

टा-आमोर्णः ॥ ६ ॥

अतः परस्य टा इत्येतस्य षष्ठीबहुवचनस्य च आमो णो भवति ॥ वच्छेण । वच्छाण ॥

भिसो हि हिँ हिं ॥ ७ ॥

अतः परस्य भिसः स्थाने केवलः सानुनासिकः सानुस्वारश्च हिर्भवति ॥ वच्छेहि । वच्छेहिँ । वच्छेहिं कया छाही ॥

---

1 B [illegible]. 2 A [illegible]. 3 A [illegible]. 4 B [illegible]. 5 A [illegible].

ङसेस् त्तो-दो-दु-हि-हिन्तो-लुकः ॥ ८ ॥

अतः परस्य ङसेः त्तो दो दु हि हिन्तो लुक् इत्येते षडादेशा भ
वन्ति ॥ वच्छत्तो । वच्छाओ । वच्छाउ । वच्छाहि । वच्छाहिन्तो
वच्छा । दकारकरणं भाषान्तरार्थम् ॥

भ्यसस् त्तो दो दु हि हिन्तो सुन्तो ॥ ९ ॥

अतः परस्य भ्यसः स्थाने त्तो दो दु हि हिन्तो सुन्तो इत्यादेशा भ
वन्ति ॥ वृक्षेभ्यः । वच्छत्तो । वच्छाओ । वच्छाउ । वच्छाहि
वच्छेहि । वच्छाहिन्तो । वच्छेहिन्तो । वच्छासुन्तो । वच्छेसुन्तो

ङसः स्सः ॥ १० ॥

अतः परस्य ङसः संयुक्तः सो भवति ॥ पियस्स । पेम्मस्स । उ
कुम्भं शैत्यम् । उवकुम्भस्स सीअलत्तणं ॥

डे म्मि ङेः ॥ ११ ॥

अतः परस्य ङेर्डित् एकारः संयुक्तो म्मिश्च भवति ॥ वच्छे । वच्छ
म्मि ॥ देवम् । देवम्मि । तम् । तम्मि । अत्र द्वितीयातृतीययोः
सप्तमी [३.१३५] इत्यमो ङिः ॥

जस्-शस्-ङसि-त्तो-दो-द्वामि दीर्घः ॥ १२ ॥

एषु अतो दीर्घो भवति ॥ जसि शसि च । वच्छा ॥ ङसि । वच्छाओ
वच्छाउ । वच्छाहि । वच्छाहिन्तो । वच्छा ॥ त्तोदोदुषु । वृक्षेभ्यः
वच्छत्तो । ह्रस्वः संयोगे [१.८४] इति ह्रस्वः ॥ वच्छाओ । वच्छाउ
आमि । वच्छाण ॥ ङसिनैव सिद्धे त्तोदोदुग्रहणं भ्यसि एतदर्थम्

भ्यसि वा ॥ १३ ॥

भ्यसादेशे परे अतो दीर्घो वा भवति ॥ वच्छाहिन्तो वच्छेहिन्तो । व
च्छासुन्तो वच्छेसुन्तो । वच्छाहि वच्छेहि ।

[illegible]

अक्लीबे सौ ॥ १९ ॥

इदुतोऽक्लीबे नपुंसकादन्यत्र सौ दीर्घो भवति ॥ गिरी । बुद्धी । तरू । धेणू ॥ अक्लीब इति किम् । दहिं । महुं ॥ साविति किम् । गिरिं । बुद्धिं । तरुं । धेणुं ॥ केचित्तु दीर्घत्वं विकल्प्य तदभावपक्षे सेर्मादेशमपीच्छन्ति । अग्गि । निहिं । वाउं । विहुं ॥

पुंसि जसो डउ डओ वा ॥ २० ॥

इदुत इतीह पञ्चम्यन्तं संबध्यते । इदुतः परस्य जसः पुंसि अउ अओ इत्यादेशौ डितौ वा भवतः ॥ अग्गउ अग्गओ । वायउ वायओ चिट्ठन्ति । पक्षे । अग्गिणो । वाउणो ॥ शेषे अदन्तवद्भावात् अग्गी । वाऊ ॥ पुंसीति किम् । बुद्धीओ । धेणूओ । दहीइं । महूइं ॥ जस इति किम् । अग्गी । अग्गिणो । वाऊ । वाउणो पेच्छइ ॥ इदुत इत्येव । वच्छा ॥

वोतो डवो ॥ २१ ॥

उदन्तात्परस्य जसः पुंसि डित् अवो इत्यादेशो वा भवति ॥ साहवो । पक्षे । साहओ । साहउ । साहू । साहुणो ॥ उत इति किम् । वच्छा ॥ पुंसीत्येव । धेणू । महूइं ॥ जस इत्येव । साहू । साहुणो पेच्छइ ॥

जस्-शसोर्णो वा ॥ २२ ॥

इदुतः परयोर्जस्-शसोः पुंसि णो इत्यादेशो वा भवति ॥ गिरिणो । तरुणो रेहन्ति पेच्छ वा । पक्षे । गिरी । तरू ॥ पुंसीत्येव । दहीइं । महूइं ॥ जस्-शसोरिति किम् । गिरिं । तरुं ॥ इदुत इत्येव । वच्छा । वच्छे ॥ जस्-शसोरिति द्वित्वमिदुत इत्यनेन यथासंख्याभावार्थं । एवमुत्तरसूत्रेपि ॥

---

[1] A [illegible] [2] P बुद्धिः. [3] P धेणू

...त्वोः पुं-स्त्रियां वा ॥ ३३ ॥

...व वर्तमानादिष्वेः [illegible] वा ॥ [illegible] ।
...त्तो । [illegible] । [illegible] । [illegible] ।
[illegible] । [illegible] । [illegible] । [illegible] ।
[illegible] । [illegible] । [illegible] । [illegible] इति सिद्धम् । [illegible]
[illegible] । [illegible] । [illegible] [illegible]
। [illegible] [illegible] वा ।

[illegible] ॥

...ण्णा ॥ ३४ ॥

[illegible] वा [illegible] । [illegible] । [illegible] इति सिद्धम्
[illegible] । [illegible] । [illegible] । [illegible] । [illegible]
[illegible] । [illegible] । [illegible] । [illegible] [illegible]
[illegible] । [illegible] ।

[illegible] ॥ ३५ ॥

[illegible]

[illegible] ॥ ३६ ॥

[illegible]

वा ॥ णि । फुल्लन्ति पङ्कयाणि गेण्ह वा । हुन्ति दहीणि जेम वा । एवं महूणि ॥ क्लीब इत्येव । वच्छा । वच्छे ॥ जस्-शस इति किम् । सुहं ॥

स्त्रियामुदोतौ वा ॥ २७ ॥

स्त्रियां वर्तमानान्नाम्नः परयोर्जस्-शसोः स्थाने प्रत्येकम् उत् ओत् इत्येतौ सप्राग्दीर्घौ वा भवतः ॥ वचनभेदो यथासंख्यनिवृत्त्यर्थः ॥ मालाउ मालाओ । बुद्धीउ बुद्धीओ । सहीउ सहीओ । धेणूउ धेणूओ । वहूउ वहूओ । पक्षे । माला । बुद्धी । सही । धेणू । वहू ॥ स्त्रियामिति किम् । वच्छा । जस्-शस इत्येव । मालाए कयं ॥

ईतः सेश्चा वा ॥ २८ ॥

स्त्रियां वर्तमानादीकारान्तात् सेर्जस्-शसोश्च स्थाने आकारो वा भवति ॥ एसा हसन्तीआ । गोरीआ चिट्ठन्ति पेच्छ वा । पक्षे । हसन्ती[3] । गोरीओ ॥

टा-ङस्-ङेरदादिदेद्वा तु ङसेः ॥ २९ ॥

स्त्रियां वर्तमानान्नाम्नः परेषां टाङस्ङीनां स्थाने प्रत्येकम् अत् आत् इत् एत् इत्येते चत्वार आदेशाः सप्राग्दीर्घा भवन्ति । ङसेः पुनरेते सप्राग्दीर्घा वा भवन्ति ॥ मुद्धाअ । मुद्धाइ । मुद्धाए कयं मुहं ठिअं वा ॥ कप्रत्यये तु मुद्धिआअ । मुद्धिआइ । मुद्धिआए ॥ कमलिआअ । कमलिआइ । कमलिआए ॥ बुद्धीअ । बुद्धीआ । बुद्धीइ । बुद्धीए कयं विहवो ठिअं वा ॥ सहीअ । सहीआ । सहीइ । सहीए कयं वयणं ठिअं वा ॥ धेणूअ । धेणूआ । धेणूइ । धेणूए कयं दुद्धं ठिअं वा ॥ वहूअ । वहूआ । वहूइ । वहूए कयं भवणं ठिअं वा ॥ ङसेस्तु वा । मुद्धाअ । मुद्धाइ । मुद्धाए । बुद्धीअ । बुद्धीआ । बुद्धीइ । बुद्धीए ॥ सहीअ । सहीआ । सहीइ । सहीए ॥ धेणूअ । धेणूआ ।

---

१ A हुन्ति दहीइं°. २ B चिट्ठंति. ३ B हसंतीओ ४ B °णूओ ५ P हुं° ६ P E °दु । दु°

